नबम्बर २०१८ (वै. २०७५)
कार्तिक कृष्ण अष्टमी तः मार्गशीर्ष कृष्ण अष्टमी पर्यन्तम्

ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि



# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् - ६ अङ्कः :- ४

सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565 मूल्यम् २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-६ अङ्कः-४

नवम्बर-२०१८

(वै० २०७५ कार्तिक कृष्ण अष्टमीतः मार्गशीर्ष कृष्ण अष्टमी पर्यन्तम्)

सम्पादकः

**डॉ० जीतराम भट्टः**

सचिवः

सहायकसम्पादकः

**प्रद्युम्नचन्द्रः**

**पत्रिका-परामर्शकाः**

डॉ० आशुतोषदयाल माथुरः

डॉ० पंकजा घई

डॉ० पूर्वा भारद्वाजः

डॉ० धनञ्जयमणि त्रिपाठी

- अनुक्रमणिका -


| क्र.सं. | | | पृ.सं. |
|---|---|---|---|
| १. | सम्पादकीयम् | | |
| २. | श्रीसीतारामचरितामृतं नाटकम् | -डॉ.कीर्तिबल्लभः शक्टा | १ |
| ३. | बालक-दीपकयोः संवादः | -प्रो.कमलेशकुमार छ. चौकसी | ६ |
| ४. | चित्रपर्णिके | -डॉ. नवलता | १४ |
| ५. | रुरु-जातक-कथा | -डॉ. अञ्जू बाला | १५ |
| ६. | स्वलाभो जनसेवाया | -डॉ. पद्म शास्त्री | १७ |


**दिल्ली संस्कृत अकादमी**

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

**DELHI SANSKRIT ACADEMY**

**(GOVT. OF N.C.T., DELHI)**

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन

**(दिल्लीसंस्कृतअकादमीपक्षे)**

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

छात्राणानामुन्नत्यै सफलतायै च मूल्यांकनस्य परीक्षायाश्चायोजनं भवति। परीक्षा छात्राणां विकासायैव भवति परीक्षया योग्यतावृद्धिः भवति। किन्तु साम्प्रतं परीक्षानाम् छात्राणां मनःसु भयं जनयति। गृहे विद्यालये वा छात्राः परीक्षायाः संत्रस्ता इव दृष्यन्ते । प्रायः छात्रेषु परीक्षायाः नकारात्मकप्रभावो परिलक्ष्यते। अभिभावका अपि स्वमनोवृत्यनुसारेणैव बालान्नुद्वेजयन्ति। अभिभावकानां महत्त्वाकांक्षयापि यदा कदा छात्राः दुष्प्रभाविताः भवन्ति। कतिपयाः छात्राः परीक्षासमये भयवशात् रुग्णा अपि भवन्ति । अस्माकं कर्तव्यमस्ति यच्छात्राणां मनोबलं वर्द्धये। संस्कृतभाषायां वर्णितानां शिक्षाणां सहाय्येन छात्रान् प्रेरयेम । यथा-"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" । "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ"। "व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनं प्रधानम्", पुस्तकस्था तु या विद्या परहस्तगतं धनं कार्यकाले समुत्पन्ने न सा विद्या न तद्धनं । यथा ऐकेन चक्रेण नरथस्य गतिर्भवेत्। तथैव पुरुषार्थेन विना दैवं न सिद्ध्यति एतादृशाः श्लोकाः छात्रान् प्रेरयन्ति। अत एव परीक्षा-समये छात्रान् प्रेरयितुं निवेदयत्ययं जनः।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदकः**
**डॉ. जीतरामभट्टः**
**सचिवः**

# श्रीसीतारामचरितामृतं नाटकम्

-डॉ० कीर्तिवल्लभ शक्टा

-गतांकात् अग्रे-

(रावणस्य राजसभायाः दृश्यम्।)

(दूतानां राजसभायां प्रवेशः)

**दूताः**- वयं भारतस्य भ्रमणं कृत्वा बहूनि धनानि संग्रह्य भवतां सान्निध्ये समागताः तावत् गृहणन्तु तावत् धनानि।

**रावणः**- साधु साधु साधु अहा अहा अहा

(घटं विलोक्य) भोः घटे किमस्ति?

**दूताः**- घटे मुनीनां रक्तमस्ति, रिक्तधनैः तैरुक्तं घटमिदं रावणस्य नाशाय पर्याप्तम्। अतो भवता सावधानतया सर्वव्यवहारं वर्तितव्यम्।

**रावणः** - दूताः सद्यः घटं नीत्वा मिथिलायाम् एकस्मिन् क्षेत्रे गर्तं कृत्वा मृत्तिकया गर्तं पूरयित्वा लकां प्रत्यागच्छन्तु। नूनमनेन मिथिलानरेशस्य जनकस्य सर्वनाशो भविष्यति।

**दूताः**- यत् आज्ञापयति देव। इति ब्रुवन् निर्गच्छन्ति। रावणः स्वसिंहासने समुपविश्य किंचित् विचार्य माल्यवानं मन्त्रीणां प्रति च कथयति।

**रावणः**- भोः मन्त्रिणः! सावधानतया शृणुत सद्य एव एतादृशीं व्यवस्थां वाञ्छामि, यत् भारते किमपि नूतनं भवेत्तस्य सूचना मत्पार्श्वे समुपलब्धा भवेत्। श्रूयते तत्र स्वर्गस्था अमराः कपिभल्लूकादयो भूत्वा पृथिव्यां समागमिष्यन्ति। विशेषतः मिथिलया सह अयोध्यायाः वृत्तं गुप्तरूपेण मत्पार्श्वे भवेत्। यत्र कुत्रापि यज्ञादयः भवन्तु तत्र स्वयमेवास्माकं राक्षसाः तत्र गत्वा विघ्नं कुर्वन्तु। अस्माकं गुप्तचरा आहिमालयात्कन्याकुमारीं यावत् सततं विचरन्तु इति। गीतम्

**इह जगति तामसी वृत्तिः सदा वर्धताम्, सदा वर्धताम्**
**इह जगति राक्षसाचारः सदा वर्धताम् सदा वर्धताम्**

**पापानां खलु वृद्धिः सदा वर्धताम् सदा वर्धताम्**

**इति रामचरितामृतनाटके प्रथमोऽङ्कः॥**

## ( द्वितीयोऽङ्कः )

### प्रथमं दृश्यम्

राज्ञः दशरथः स्वसिंहासने मलिनमुद्रायाम् उपविष्टो दृश्यते।

सुमन्तस्य प्रवेशः (प्रविश्य)

**सुमन्तः**- अद्याहं प्रभूणां मुखाकृतिं विलोक्य किंचित् विभेमि, किमर्थमस्ति शैथिल्यम्। कारणं ज्ञातुमिच्छामि।

**दशरथः**- मित्र! गतं मे यौवनं खलु। इमे श्वेतकेशाः मम समश्रुश्च बोधयन्ति माम् जीवनस्यावधिः समाप्तिं प्रति अग्रेसरा। तिस्रा मम भार्या परं..........(दीर्घं निःश्वस्य) जीवनान्ते मम राज्यभारं सोढुं कः समर्थो भविष्यति। चिन्तयामि किं सूर्यवंशस्योऽहं निरर्थको निष्फलोऽन्तिमो वंशधरः?

गीतम्

**सखे वृद्धत्वमायातः मदीये जीवने सत्यम्**
**अपत्यं नास्ति मे दुःख सदा माम् बाधते नूनम्।**
**इमे केशा सुश्वेताः मे समश्रुश्चापि सुश्वेता**
**दशा वृद्धस्य गायन्ति न मे सौख्यं न सन्तोषः॥**

झटित्येतादृशं मह्यमुपायं ब्रूहि। येन मे सन्ततिर्भवेत्

**सुमन्तः**- राजन्! न शोभन्ते भवादृशाणां नृपतीनामधैर्ययुक्तानि वचांसि। यतो हि-

**भवादृशानां ननु भूपतीनां**
**धैर्यस्य हानिः न हि शोभतेऽत्र**
**धैर्यं प्रभूणां परमं हि लोके**
**धनं विशेषं निहितं विधात्रा॥**

अतो निवेदयामि कुलगुरुं समाहूय विषयेऽस्मिन् मन्त्रणा कर्त्तव्या।

**दशरथः**- भोः सुमन्त! सादरेण झटिति कुलगुरोरागमनस्य व्यवस्था विधातव्या।

सुमन्तः- आज्ञा शिरोधार्यास्ति महाराज

(दृश्यपरिवर्तनम्)

(पुत्रेष्टियागस्य दृश्यम्)

(राजा दशरथः तस्य तिस्रा राज्ञः अन्ये आचार्याः ऋत्विजाः याज्ञिकाश्च अन्ते प्रसाद वितरणम्।)

(पटाक्षेपः)

(दृश्यपरिवर्तनम्)

कैकेयाः सुमित्रायाः कौशल्यायाश्च प्रसूतिगृहाणि स्वस्वक्रोडेषु सर्वाराज्ञः स्वशिशूनां सह विराजमाना दृश्यन्ते। देवाः गुप्तरूपेण समेषां बालकानां नीराजनं कुर्वन्ति।

देव गायन्ति

**अद्य रामो हरिः आगतो हे सखे**
**भू धरायां विशेषेण शेषान्वितो।**
**राक्षसाणां विनाशाय कालोऽस्ति यः**
**सो हरिः सर्वदा सानुकूलो भवेत्॥**
**अद्य जाता धरित्री पवित्रा ननु**
**मोदमाना वयं देवताः मानवाः**
**उत्सवे रामजन्मस्य क्रीडारताः**
**तं हरिं सर्वदा भो नमामो वयम्**
**राघवो रामचन्द्रः प्रसूतस्स्वयं**
**यो कृपालुः दयालुः सदा मोक्ष्यदः।**
**तं नमामो वयं तं जपामो वयं**
**तं भजामो वयं श्रद्धया सादरम्॥**

(दृश्यपरिवर्तनम्)

गहनतमे वने ऋषीणां यज्ञस्थलं, ऋषयः यज्ञरताः दृश्यन्ते

ॐ स्वाहा

ताड़कायाः प्रवेशः

भो बान्धवा:! आगच्छन्तु आगच्छन्तु, पश्यन्त्वत्र यज्ञ: भवति।

**विश्वामित्रः** - भो: भो: दुष्टचेतसा सावधानेन श्रृण्वन्तु। क्षिप्रं गत्वाऽहं भवतां महाकालं श्रीरामचन्द्रं समाहूय आगमिष्यामि।

इति निर्गत:

**पटाक्षेप: दृश्यपरिवर्तनम्**

**( राजा दशरथस्य सभादृश्यम् )**

राजानमुपगम्य द्वारपाल: कथयति

**द्वारपाल:**- विजयतां महाराज:। विश्वामित्रो मुनि: भवता सह मेलनेच्छया द्वारि विराजते।

**दशरथ:**- प्रवेश्यताम्

(विश्वामित्रस्य आगमनम्।)

**दशरथ:**- (आसनादुत्थाय) दशरथस्य प्रणाम: स्वीकुर्वन्तु मुनिवर्या:। आगमनस्य सूचनां विना भवता समागमनं मम हृदयं स्फुरायते भगवन्! सर्व कुशलं त्वस्ति?

**विश्वामित्र:**- विजयतां महाराज! कुशलं नास्ति

**यज्ञे विघ्नरता: सन्ति राक्षसा: दुष्टचेतसा:।**
**वने रामेण हन्तव्या मारीचाद्या ह्यनेकश:॥**

**दशरथ:**-किं कथयति भवान्! रामेण हन्तव्या? रामस्तु किशोर एव, अबोध: स किमपि न जानाति।

**विश्वामित्र:** - आम महाराज! ताड़काया: विनाशाय रामं याचितुमत्राहं प्रस्तुत:

**दशरथ:**-

**दातुं समर्थोऽस्मि धनं बलं च**
**तथा च राज्यं विपुलं सकोषम्**
**ऋषे न दातुं ममतायुतं तं**
**प्राणस्वरूपं मम ज्येष्ठपुत्रम्॥**

**विश्वामित्र:**- राजन्!

**याचेऽहं न तु स्वार्थाय रामं जानीहि केवलम्।**
**लोकानामुपकाराय वर्तते मम प्रार्थना॥**

**दशरथः**- ऋषे! कथं प्राणसंकटं करोषि? किं न जानासि? अस्यां जरायां मम सुतोत्पत्तिः। सर्वे सुताः मम प्राणप्रियाः तत्र रामस्तु द्वितीयो मे प्राणः।

**विश्वामित्रः**- राजन् यद्यपि जानामि मानसं भवतां तथाप्यहं राक्षसानां विनासाय केवलं राममेव वाञ्छामि।

**दशरथः**- ऋषे! रामस्तु कोमलाङ्गः किशोरश्च साम्प्रतं पुष्पशय्यासिनः, तत्र राक्षसाः, वनचराः कृशगात्राः, पुनश्च यद्यपि राजपुत्रोऽस्ति रामः परमधुना न जानाति शस्त्रादीनां प्रयोगः, सम्यग् विचार्य कथयाम्यहं किमसमीचीनं नास्ति भवतां कथनम्?

**वशिष्ठः**- राजन्! विषयेऽस्मिन् चिन्तनं जहीहि। रामस्तु साक्षात् नारायणो विष्णुः अतः लोककल्याणाय रामेण सह लक्ष्मणमपि विश्वामित्रस्य साहाय्यै सुसज्जीकुरु, आभ्यां स्वयं विश्वामित्रः धनुर्विद्यां प्रदाष्यन्ति।

### ( दृश्यपरिवर्तनम् )

विश्वामित्रेण सह रामलक्ष्मणयोः वनगमनं दृश्यते।

**विश्वामित्रः**- भो राघव! इदानीं वनप्राप्ता वयम्।

**रामः**- परितः विलोक्य मुने इयं तु विधेरनुपमा सृष्टिः।

**लक्ष्मणः**-भो मुने! यदा वयं तत्र गृहे वसन् पुष्पवाटिकायां भ्रमणहेतोः गच्छन् परिफुल्लिताः पादपाः अस्मान् दृष्ट्वा हसन्ति स्म परमत्रत्याः लम्बायमाना गगनचुम्बिन्यः विशालाः वृक्षास्तु सगर्वाः प्रतीयन्ते।

(सहसा ताड़कायाः प्रवेशः)

### ( गीतम् )

**अत्र वृक्षाः घनाः लम्बिता भूरिशः**
**पुष्पिताः पादपाः मोदमानाः शुभाः।**
**सिंहव्याघ्रादयः वन्यजीवा इमे**
**सन्ति नैकाः प्रसन्ना वने नित्यशः॥**
**काननेऽस्मिन्कुटीरो मया दृश्यते**
**सन्मुनीनां निवासः श्रुतं भो मया।**

तान्भक्षयन्मोदयुता वयं
खेलयामो वने कूर्दयामो ननु॥

**विश्वामित्रः**:- भो राम! पश्यैषा ताड़का अत्रैवागच्छति अस्य वधं कुरु।

**रामः**:- भो मुने! अहं रघुवंशी, रघूणां कुले कोऽपि स्त्रीवधं न करोति। अतः अहमपि स्त्रीवधे ह्यसमर्थोऽस्मि।

**विश्वामित्रः**:- चिन्तया अलम्। शास्त्रेषु लिखितमस्ति यज्ञविध्वंसको यः कोऽपि भवेत् तस्य वधः कर्त्तव्यमेव।

**ताड़का**-(आ हा हा अट्टहासं कुर्वन् सुबाहुं मारीचं चाह्वयति।) भो! सुबाहु! भो मारिच! झटिति अत्रागच्छतु एषः विश्वामित्रः स्वसाकं मधुरे फले आनीतः। अतो मुनेः साकं फलयोः भक्षणं कृत्वा आनन्दिताः भविष्यामः।

**मारीचः**:- आम्! अतिमधुरं भविष्यति अनयोः मांसम्।?

**ताड़का**- रे रे वृद्धमुने! न जानासि माम्। ताड़काराक्षसी नामधेयाऽहं युस्माकं कालस्वरूपा। बलमस्ति चेत् युद्धाय सुसज्जीभव अन्यथा खड्गोऽयं मम युष्माकं शिरांसि क्षिप्रमेव कर्तयिष्यति।

**रामः**:- (शरासनात्वाणं निष्काष्य धनुषं सुसज्य) भो भो ताड़के पापिष्ठे नन्वागता ते मृत्युः खलु बाणसन्धानं करोति ताड़कारामयोः युद्धं भवति त्वरितं हा हा हा कुर्वती ताड़का प्राणान्त्यजति।

भुविं पतितां तड़कां दृष्ट्वा सुबाहुः प्रथमं रोदनं करोति। तत्पश्चात् मारिचं कथयति- सुबाहुः भो भ्रातः! इदानीं रोदनेनालम्। उत्तिष्ठ आवयोराहारस्तु पुरः एव प्रथमं विश्वामित्रेण सह किशोरयोः आस्वादनं भवेत्तत्पश्चात् ताड़कायाः शरीरस्य सद्गतिः करिष्यावः।

**मारीचः**:- युद्धार्थं कृतनिश्चयः मारीचः साट्टहासेन सह यावत्रामस्यानुमुखो भवति तावत्रामः स्ववाणेन तं पञ्चाशतयोजनं दूरं प्रक्षेपयति।

नेपथ्ये हा हा हा अहं क्व गच्छन् अस्मि क्व गच्छन्नस्मि इति मारीचस्य वाणी श्रूयते।

**सुबाहुः**- रामं वीक्ष्य मनसि चिन्तयति " अये नायं किशोरः सम्भवतः कपटयुतः कोऽपि तान्त्रिकः विश्वामित्रेण सह आयातः स्पष्टम् "भोः कोऽसि त्वं, जानाम्यहं ऋषेः चातुर्यं सः नन्वत्र तन्त्रविद्यां प्रसाय महाबलिनं किशोरं करोति।

पश्याम्यहं युष्माकं बलम् सुबाहुः अहं बाहुभ्यां निबध्य शीघ्रं मृत्युमुखे पातयिष्यामि।

**रामः**- द्वन्दाय समागच्छ पातकी कः मृत्युमुखं यास्यति अस्य निर्धारणं शीघ्रमेव भविष्यति।

अट्टाहासेन सह सुबाहुः रामाभिमुखं यावत्खड्गमादाय धावति तावत् रामः तस्य वधं करोति। ऋषयः पुष्पवर्षां कुर्वन्ति, रामस्य जयघोषं कुर्वन्ति।

### ( दृश्य परिवर्तनम् )

(जनकपुरीतः राज्ञः जनकस्य दूतस्य प्रवेशः)

**दूतः**- अहो विशाले सघनेऽस्मिन् कानने कथमन्वेषयामि ऋषेः विश्वामित्रस्य कुटीरम्। आम् इतः पूर्वस्यां दिशि आयाति हवेः सुगन्धिः अतोऽस्मिन्नेव पथि गन्तव्यम् मन्ये ऋषयः तत्र यज्ञरताः भविष्यन्त्यैव।

**यज्ञः स्वर्गस्य सोपानं प्रवदन्तीति देवताः।**
**यज्ञो श्रेष्ठतमं कर्म सर्वं यज्ञे प्रतिष्ठितम्॥**

"सहसा शंखध्वनिः श्रूयते अनेन सह मन्त्राणां स्वाहा ॐ स्वाहादयो ध्वनिरपि श्रूयते॥"

कर्णं दत्वा आम् समुचितोऽस्मि। अस्मऽहं मुनीनां सामीप्यैव। झटिति गत्वा विश्वामित्रं प्रणम्य राज्ञः जनकस्य पत्रं ददाति।

**विश्वामित्रः**- पत्रमुद्घाट्य पठित्या रामं कथयति- भो राम! इदानीमेवमस्माभिः जनकपुरं प्रति गन्तव्यम्, यतो हि तत्रत्यः नृपः जनकः स्वतनयायाः स्वयंवरस्यायोजनं करोति।

**रामः**- (स्वागतम्) "आह जनकपुरम् इत्युच्चारणे मम हृदि विशेषोत्कर्षः कथं भवति" स्पष्टम् ऋषे! यदाज्ञापयति ममापि इच्छा भवति जनकपुरीं गमनाय।

(अग्रे अग्रे विश्वमित्रः तदनु रामलक्ष्मणौ गमनरतौ दृश्येते।)

## ( अहल्यातारणम् )

मार्गे एकातीवाकर्षणकारी शिला दृश्यते।

शिलां दृष्ट्वा

**रामः**- भो! मुने अस्यां भयदायिनीमरण्यां कीदृशी सुन्दरी शिला विद्यतेऽत्र खलु

विश्वामित्रः-

**शापात्प्रस्तरतां याताऽहिल्या सुन्दरी ननु।**
**ऋषे गौतमभार्येयं मुक्तिं वाञ्छति साम्प्रतम्॥**

अतो पादस्पर्शं कृत्वाऽस्याः मुक्तिं करोत्वार्य!

यावद्रामः शिलायाः स्पर्शं स्वदक्षिणपादेन करोति तावत् सा दिव्यरूपवती भूत्वा रामं समाराधयति-

**पापात्माहं प्रभो नारी सर्वथा पापचारिणी।**
**क्षमस्व मेऽपराधं भो दयां कृत्वा सुरेश्वरः॥**
**तव प्रसादत्विमुक्ताऽहं शापात्घोरतरात्प्रभो।**
**अधुना गन्तुमिच्छामि स्वपतेः चरणयोः वरम्॥**

(इति कीर्तिवल्लभशाकटायनेति कविना विरचितं श्रीसीतारामचरितमिति नाटके द्वितीयोऽङ्कः॥)

**- सरस्वतीविहारः, एम.ई.एस.कैम्पसमीपे**
**चम्पावतम्, उत्तराखण्डम्-२६२५२३**

# बालक-दीपकयोः संवादः

-प्रो० कमलेशकुमार छ. चौकसी

(अधुनातने समाजे पारिवारिकीभावना प्रायः भग्नतां प्रति प्रस्थिताः दृश्यते। एतेन वयं सर्वे चिन्तिताः स्मः। चिन्तामिमां च पारस्परिके वार्तालापे संवादे वा कुर्वन्तः स्म एव। वर्तमाने जगति याः समस्याः प्रवर्तन्ते तेषु इयमपि एका समस्या। समस्यायाः चिन्ताः कः बुद्धिमान् न कुर्यात्। अतः चिन्ताकरणं तु व्यावहारिकम्। अथ च यदि वयं चिन्तां न करिष्यामः तर्हि तादृशीं चिन्तां कः करिष्यतित्यपि प्रश्नः।

तथापि अस्याः समस्यायाः समाधानं कथं भवितुमर्हति इत्यपि विचारणीयं भवति। आधुनातने समाजे परिवारे राष्ट्रे वा विद्यावन्तः बालकाः विचारशीलाः सन्तीति प्रतिप्रसङ्गं वयमनुभवामः। अतः यदि तेभ्यः पारिवारिकीभावना इयं केवलमस्मदीया परम्परा अस्ति अतः सा परिपालनीया इत्येवमेव उपदिशामः तदा ते केवलं श्रुत्वैव विरमिष्यन्ति। पारिवारिक्याः भावनायाः या महती आवश्यकता दृश्यते जीवने, सा यावत्पर्यन्तं तर्केण दृश्येन वा बालानां समक्षं प्रस्तुता न भवति तावत् पर्यन्तं ते तादृशीं भावनां स्वीकर्तुं पुरस्कर्तुं वा सज्जाः न भविष्यन्ति। एतत्सर्वं मनसि कृत्वा अस्माभिः अत्र बालक-दीपकसंवादे जगति यत्सर्वं वस्तु वर्तते तत्सर्वं परिवारमयमेवेति तर्केण विविधेन दृश्येन चात्र पारिवारिकीभावनायाः आवश्यकत्वमत्राकारितमस्ति।। इत्यलं बुद्धिमद्वर्येषु।।)

**प्रस्तावना-**

**दीपावल्याः निशाकाले भवति दीपदर्शनम्।**
**यत्र तत्र च सर्वत्र दीपाः दीपाः भवन्ति वै॥१॥**
**एकदा बालकः कश्चित् दृष्टवा दीपान् समुज्वलान्**
**वाचा सरलया स्वीया संवादमिममाचरत्॥२॥**

बालकः उवाच-

अयि दीपक मित्रं मे मनो मे मोदते सदा।
दृष्ट्वा त्वां यत्र कुत्रापि ततो संवादमाचर।।3।।

दीपकः उवाच-

अयि बालक मित्रं मे मनो मे मोदते सदा।
दृष्ट्वा भवादृशान् बालान् यथेष्टं वद मा शुचः।।4।।

बालकः उवाच-

मदीयः परिवारोऽस्ति यत्र सुखं वसाम्यहम्।
त्वदीयः कः परिवारः यत्र त्वं वससि सदा।।5।।

दीपकः उवाच-

अत्र विना परिवारं न हि किमपि वर्तते।
महद्वा लघु वा वस्तु चेतनमचेतनं तथा।।6।।
सर्वे सदा परिवारे स्थितं भवति बालक।
व्यक्तिरूपे समुत्पन्नं समष्टिर्वा भवेदिह।।7।।
कल्पना प्रकृतेरियं संकल्प ईश्वरस्य वा।
यत्सर्वं जगति वस्तु तत्परिवार एव स्यात्।।8।।

बालकः उवाच-

भवतां कथनं सत्यं जानामि स्नेहभावतः।
तथापि मे न विश्वासः जायते वचने तव।।9।।
अतः केनाप्युपायेन मां बोधय हे सखे।
विना बोधं न हि तोषः मनसि मे न जायते।।10।।

दीपकः उवाच-

पश्य मित्रं समक्षं यत् कायरूपेण तिष्ठसि।
त्वदीयस्य हि कायस्य परिवारः प्रवर्तते।।11।।
परिवारेऽत्र के जनाः यदि विज्ञातुमर्हसि।

तदा त्वं पश्य कायं स्वं सैवोत्तरं प्रदास्यति।।12।।

बालकः उवाच-

काय: मेऽचेतनोऽस्तीति वक्तुं न पारयत्यतः।
त्वमेव तन्मुखं भूत्वा समादधतु हे सखे।।13।।

दीपकः उवाच-

शृणु त्वं सावधानेन मदुक्तं वचनं सखे।
तेन हि त्वं विजानासि कायस्यास्य परिवारम्।।14।।
कस्यास्य परिवारे मुखं नेत्रं शिरस्तथा।
हस्तौ पादौ च कर्णौ च कपोलः नासिका तथा।।15।।
अङ्गान्येतानि सर्वाणि कायस्यैव परिवारः।
परिवारे तथा सर्वे वर्तन्ते मानवाः यथा।।16।।
परिवारे जनाः सर्वे कार्यं संमिल्य कुर्वते।
तथैवैतानि सर्वाणि कायाङ्गानि प्रकुर्वते।।17
व्यक्तिरूपेण भिन्नास्ते कार्यस्य करणे सदा।
एकीभूय प्रवर्तन्ते तस्मात् ते पारिवारिकाः।।18।।

बालकः उवाच-

धन्यवादान् वितरामि भवते गुरुरूपिणे।
परिवारे स्थितोऽप्यहं तदर्थं नावज्ञातवान्।।19।।
अद्य त्वत्कृपया मान्य परिवारार्थविदहम्।
संमिल्य कर्मकर्ता यः परिवारः तदुच्यते।।20।।

दीपकः उवाच-

ज्ञातस्त्वया यदर्थोस्ति स एव कथितः मया।
इत्थं जगति सर्वत्र परिवारः प्रवर्तते।।21।।
मदीये परिवारेऽपि चत्वारः घटकाः स्मृता।
शिखा पात्रं च स्नेहं च वह्निः पूज्यतमः तथा।। 22।।

वयमेते परिवारे वसामः सहभावतः।
संमिल्य कर्म कुर्वन्तः काशयामः निरन्तरम्।।24।।
प्रकाशकरणे नित्यं भावना पारिवारिकी।
निमित्तं भवति नान्यत् कारणमिह हि विद्यते।।25।।
पात्रस्येच्छा यदि कर्तुं प्रकाशस्य भवेदिह।
विना स्नेहं विना शिखां विना वह्निं कुतः फलेत्।।26।।
परिवारगतानां वै समाना भवति स्थितिः।
कश्चिदेकैव सदस्यः प्रकाशं न करिष्यति।।27।।
सर्वे संमिल्य कुर्वन्ति तमसः हरणं सदा।
सन्तः साफल्यभागिनः पूज्यन्ते भक्तगणैरिह।।28।।
दीपावल्यां कृतो दीपः प्रकाशं कीरति यदा।
परिवारसदस्यानां तदा त्वं स्मरणं कुरु।।29।।

**बालकः उवाच-**

परिवारे मदीये हि माता पिता स्वसा तथा।
अहं चेति जनास्तत्र चत्वारस्संख्यया स्थिताः।।30।।
संमिल्य कर्मकुर्वन्तः विचरामः सुखे सदा।
भविष्यति सदा सर्वे स्थाष्यन्ति नात्र संशयः।।31।।

**दीपकः उवाच-**

सम्मेलनं परिवारे राष्ट्रेऽथ जनसंसदि।
यदा प्रवर्तते नित्यं तदा सुखं प्रजायते।।32।।
स्वार्थेन विघटितो नः लभते न सुखं कदा।
यथा पात्रेऽग्निरेकाकी न जातु तिष्ठति क्षणम्।।33।।
स्नेहं च समवाप्येषः सुदीर्घं समयं स्थितः।
तेजः प्रदाय जीवेभ्यो जीवतीह निरन्तरम्।।34।।
तथैव मानवः सर्वः सम्मिल्य कार्यमाचरन्।

सुखं प्रदाय जीवेभ्यो जीवतीह निरन्तरम्।।35।।
हे बालक त्वं जिज्ञासुः श्रृतवान् वचनं मम।
तथा सर्वपदार्थेभ्यः श्रुणु वचनमुत्तमम्।।36।।
सन्ति विश्वपदार्थाः ये स्वपरिवारस्थिताः।
प्रदिशन्ति जनान् सर्वान् सम्मिल्येह स्थिरो भव।।37।।

**बालकः उवाच-**

अद्य प्रभृति सर्वाणि कार्याणि मे भविष्यति।
तत्सर्वाणि करिष्यामि सम्मिल्येति ब्रवीमि ते ।।38।।
कार्यं भवतु राष्ट्रस्य समाजस्य निजस्य वा।
करिष्यामि बहुकार्यं परिवारे स्थितः सदा।।39।।
एष मदीय-संकल्पः यावच्चन्द्रदिवाकरौ।
यावच्च वहति गंगा तावत् स्थाष्यति सर्वथा।।40।।

।।इति समाप्तोऽयं दीपकबालकयोः पारस्परिकः पारिवारिकीभावनायाः प्रसारकः संवादः।।

**-संस्कृतविभागः, भाषासाहित्यभवनम्,**
**गुजरात विश्वविद्यालयः, नरंगपुरा,**
**अहमदाबादम्-३८०००९ ( गुजरात प्रदेशः )**

# चित्रपर्णिके

-डॉ० नवलता

कुड्मे कुड्मे विहर स्वैरं
पुनरेहि च मे गेहम्।
त्वया सहैवेड्यितुमम्बरे
भोः मुग्धेऽभिलषेऽहम्।।

केन चित्रकारेण निर्मिता
भव्या तनुस्त्वीया?
नानावर्णैश्चित्रबिन्दुभि-
र्भाति मनोरमणीया।।

पुष्पपल्लवे यदा निषण्णा-
मनुधावामि सलीलम्।।
पलायसे त्वं झटिति चञ्चले
जानेऽहं तव शीलम्।।

वने-वने गायन्ती मन्दं
नृत्यन्ती विहरन्ती।
दूरेऽतीव दृश्यतेऽनुपलं
तरुपत्रेषु लसन्ती।।

सुन्दरि सुन्दरसुमःसङ्कुले-
ऽतिथिर्भवसि यन्नित्यम्।
सदयं स्वीकरोषि रसचषकं
समर्द्धयसि लालित्यम्।।

चित्रपतङ्गित्वं प्रबोधयसि
लोकममुमिदं रुचिरम्।
समस्वभावगुणेषु सर्वदा
फलति सौहृदं सुचिरम्।।

-के-६८०,आशियाना कॉलोनी,
कानपुर रोडः, लखनऊ उत्तर प्रदेशः

# रुरु-जातक-कथा

—डॉ. अन्जु बाला

पर-दु:खमेव साधूनां दु:खं भवति। ते न सहन्ते परेषां दु:खं। एकदा बोधिसत्व: परमदर्शनीय: रत्नाकर इव पादचारी रुरुमृगो बभूव। मानवानां निर्दयतां जानन् स: निर्जनवने अभिरेमे।

पटु-विज्ञानत्वाच्च मृगान् अवबोध्य प्राचार्य इव वने तेषां आधिपत्यं चकार। एकदा बोधिसत्व: गहनवने समीप-वाहिन्या नद्या ह्रियमाणस्य करुण-क्रन्दनं श्रुतववान्। अनेन क्रन्दनेन समभिहन्यमान: स: अवदत्।

'मा भैषी'। एवं भय-अपनोदिनीं मानुषीं वाचं वदन जलवेगेन आनीयमानं पुरुषं दृष्ट्वा नदीं जगाहे।

भयातुर: श्रमेण शिथिल-शरीर: स: तस्य पृष्ठमेव आधिरुरोह। अन्ते च मनोनुकूलं कुलं प्राप्तवान्।

मानवस्तु तस्य रूपशोभया विस्मय-बहुमान: प्रणम्य अवदत्-'एतत् कार्यं तु बाल-सखापि कर्तुं न शक्यते। मे प्राणास्तु त्वदीयाया'। रुरु-मृग अवदत्-'भवानेव मां रक्षितुमर्हसि। कृपया मे रूप-विषये कस्मिश्चिदपि न निवेद्य:'।

स: नर: तथेति उक्त्वा, महासत्त्वं प्रणम्य स्वगृहम् आगतवान्। तस्मिन्नेव नगरस्य राज्ञी प्रात:काले स्वप्नं अपश्यत् यत् सिंहासनस्थ: रुरुमृग: पर्षदा परिवृतं मानुषेण वचसा धर्मं उपदिशति।

सा तद् विषये राज्ञे निवेदितवती। राज्ञा मृगस्य अन्वेषणार्थं घोषणां कारितवान्-'य: रुरु-मृगस्य विषये सूंचनां दास्यति तस्मै उपहार-रूपेण सुवर्ण-मुद्रा: दास्यामि'। अनया दोलायमन: स: पुरुष: राजानं प्रति गत्वा अकथयत् -'देव! अहं तं मृगवरं जनामि, कृपया मया सह गहनं वनं प्रति आगच्छन्तु भवान्'।

राज्ञ तेन सह वनं उपेयिवान्। तत्र रुरु-मृगेण सः पुरुषः दृष्ट्वैव प्रत्यभिज्ञाय उक्तः-' भो! कष्टं दयया आर्द्र-चित्तेन मया यः पुरुषः रक्षितः सैव माम् विपदि पतितवान्। अथ क्रुद्धः राज्ञा तं कृतघ्नं पुरूषं ज्ञात्वा यावत् बाण-सन्धानं करोति तावदेव करुणा-परायणः -रु रु मृगः मध्ये स्थित्वा अकथयत्-

'मृतमेनं पुरुषं मा मारयतु महाराज! अस्य इप्सितम् उपहारं दत्वा सफलं करोतु'।

सादर-भावेन नतो राज्ञः अवदत्-'साधु! साधु! मानवोचितगुणाः तु भवत्येव वर्तन्ते। कृपया अस्मभ्यं धर्मोपदेशं दत्वा अनुगृहणन्तु'।

तदा बोधिसत्त्वः उक्तवान्-' महाराज! सर्व-प्राणिषु दयाभावः सर्वोपरि, अतः स्वकर्तव्यस्य पालनं कुर्वन् सदाचरणं कुर्यात् एवं भवान् सर्वाषां चित्तेषु राज्यं करिष्यति'।

अनन्तरं सः राज्ञा तस्य वचनम् अभिनन्द्य सपौर-जनपदो धर्मपरायणः बभूव अभयं च सर्व-मृग-पक्षिणां दत्तवान्।

**भारतीय विद्या भवनम्,**
**मेहता विद्यालय,**
**नव देहली**

# स्वलाभो जनसेवया

-डॉ० पद्म शास्त्री

कस्मिँश्चिद् ग्रामे कृषकदम्पती न्यवसताम्। तौ कृषिकार्येण स्वजीवनमयापयताम्। कृषकाणां कृते कृषिकार्यार्थं पशूनां पालनमप्यावश्यकं भवति अतस्तौ पशूनप्यपालयताम्। देवाराधनेन वृद्धावस्थायां तयोरेकः पुत्रः समजनि। कृषकदम्पती चातीव प्रसन्नौ स्वपर्णकुटीपरिसरे कक्षमेकमिष्टकानां विनिर्मापितवन्तौ। यज्ञधूमपाविते़ऽस्मिन् कुटीरे स्वपुत्रस्य नामकरणसंस्कारमकुरुताम्।

समयगतिः परिवर्तनशीला भवति। चक्रनेमिक्रमेण मानवस्य भाग्यरेखापि परिवर्तते। सहसा केनापि भीषणेन रोगेणाक्रान्तः कृषकोऽयं परलोकस्यातिथिः सञ्जातः। वराकः पुत्रस्त्वधुना पञ्चवर्षदेशीय एवासीत्। कृषक-भार्याया नेत्रयोरग्रतो गाढान्धकारः प्रसृतः। सा एकाकिनी किं कर्तुं शक्नोति स्म? विधातापि सततं निर्बलमेव परीक्षते। यथाकथञ्चिद् रात्रिन्दिवं श्रमं कृत्वा पुत्र-पोषणपरायणा स्वजीवनयात्रां प्रचालितवती। क्रमेण पुत्रोऽयं यौवनपदवीं समारूढः। स्वमातुः श्रमशीलतां विलोक्य पुत्रेणैकदा कथितम्-मातः! मया चाजीविकार्थं स्वजीवने किं करणीयम्?

माता कथयति-ग्रामादस्मात्सुदूरं वर्तते एकस्य सिद्धपुरुषस्याश्रमः। तस्मिन् आश्रमे वस्तुतः सिद्धपुरुषश्चैको निवसति। तत्पार्श्वं गत्वा पृच्छतु किं कार्यं करवाणि? तव पितापि समागते संकटे तेन सिद्धपुरुषेण सह परामर्शमकरोत्। सिद्धस्तव पितरमुपदिदेश यज्जनसेवया स्वलाभो जायते। सिद्धपुरुषस्याशिषा निश्चितमेव साकल्यमवाप्स्यसि स्वजीवने।

कृषकसुतस्य युवकस्य मनसि आशायाः सञ्चारः समजनि। माता मार्गे भक्षणार्थं पुत्रस्य कृते यत्किञ्चिद् भोजनं विपाचितवती। पुत्रः प्रातराशस्य पोटलिकां नीत्वा प्रातरेव गृहाद्विनिर्गतः सिद्धपुरुषस्याश्रमं प्रति। निर्गमनकाले शुभसूचकानि निमित्तानि सञ्जातानि।

मार्गे ग्रामश्चैकः समागतः। मार्गस्य निकट एवावर्तत कृषकस्य गृहमेकम्। कृषकदम्पती कृषक-पुत्रस्य स्वागतमकुरुताम् पृष्टवन्तौ च क्व गच्छति भवान्? कृषकयुवकः सिद्धपुरुषस्य दर्शनं कर्तुं स्वभाग्यं प्रष्टुञ्च कथितवान्। कृषकदम्पतीभ्यां कथितं किं भवान् प्रश्नमेकमस्मत्कृतेऽपि प्रष्टुं शक्नोति? कृषकयुवकेन कथितम् अवश्यमेव प्रक्ष्यामि।

तौ प्रोचतुः –अस्मद् गृहाद्बहिः द्वौ चाम्रवृक्षौ वर्तेते परन्तु तौ फलरहितौ, किं कदाचिदनयोः फलानि लगिष्यन्ति? इति पृष्ट्वा चागन्तव्यं भवता। आमिति व्याजहार कृषकयुवकः।

तस्माद् ग्रामान्निर्गत्य कृषकयुवकोऽयमग्रे प्रचलन्नास्ते। पुनः ग्राममेकं समासादितं तेन। तस्मिन् ग्रामेऽपि मार्गस्य सन्निकटे परिवारश्चैको न्यवसत्। परिवारेऽस्मिन् दम्पती मूका चैका पुत्री वर्तते। दम्पती तस्य युवकस्यातिथ्यं कृत्वा पप्रच्छतुः –कुत्र गम्यते भवता चैकाकिना। कृषकयुवकोऽयं सिद्धपुरुषसम्बन्धिनं समस्तं वृत्तं श्रावितवान्, दम्पतीभ्यां कथितम्–अस्माकमपि प्रश्नमेकं पृच्छतु सिद्धपुरुषं यदस्माकमियं पुत्री जन्मत एव मूका वर्तते। न कोऽप्यनया सह विवाहं कर्तुमिच्छति, इयं कदाचिद् वदिष्यति न वा इत्येवावयोः प्रश्नः। कृषकयुवकेन कथितम्–अवश्यमेव प्रक्ष्यामि प्रश्नमेनम्।

इत्युक्त्वा युवकोऽयं तृतीये दिने चाग्रे प्रचलन्नास्ते, सुदूरे विनिर्गते सति सम्मुखं विशाला चैका नदी समागता। जलसम्पूरितेयं नदी तर्तुमशक्या वर्तते। यावत्स विस्तृतं नदीतटमवलोकयति तावन्मणिधरः सर्पश्चैकः सम्मुखमागतः। स्वफणां न्यक्कृत्य युवकस्यास्य स्वागतं व्याहृत्य मणिधरेण सर्पेण पृष्टम्–क्व गम्यते भवता? युवको मणिधरसर्पमादितः सर्वं वृत्तमश्रावयत्। मणिधरसर्पः प्रोक्तवान्–भवता नदी तर्तुं न शक्यते। मणिप्रभावेणाहं त्वां पारं नयामि, परं भवतापि ममैकः प्रश्नः प्रष्टव्यः "कदाहं सर्पयोनिं परित्यज्य मानवयोनिं प्राप्स्यामि"। इत्युक्त्वा मणिधर–सर्पः कृषकयुवकास्याग्रे नदीजले प्राचलत्, मणिप्रभावेण नदीजलं तत्कृते स्वयमेव मार्गं प्रादात्। इत्थं युवकोऽयं नदीपारमागतः तस्मादपि युवकोऽयं त्रिगव्यूतिं यावत् पुनश्चाग्रे प्राचलत् तदा सिद्धपुरुषस्याश्रममपश्यत्।

आरण्यकनदीतटे आश्रमस्य स्थानमतीव पावनमासीत्। पुष्पफलसमन्विता वृक्षाश्चाश्रमस्य शोभां द्विगुणितामकुर्वन्। वन्यमृगाश्चेतस्ततो विचरन्तश्चासन्। एकतश्छात्रा वेदध्वनिमकुर्वंश्चान्यतः कोकिलानां विरुतेन निनादिते आसीत्प्रदेशोऽयम्। आश्रमस्य मध्यभागे सिद्धपुरुषस्य पर्णशाला शोभते स्म। युवकोऽयं सिद्धपुरुषं साक्षाद् भगवन्तं मत्वा चरणयोः पपात। सिद्धपुरुषोऽप्याशीर्वादेन तमभ्यनन्दत्, पप्रच्छ चामगनप्रयोजनम्।

किञ्चिद् विश्रम्य युवकेन निवेदितम्–मया किमपि प्रष्टव्यमस्ति। सिद्धपुरुषेणोत्तरितम्–त्रयाणामेव प्रश्नानामुत्तराणि कथयिष्याम्यहम्। युवकेन मनसि विचारितम्–प्रश्नत्रयन्तु मार्गस्थितानां जनानामेव वर्तते। मम प्रश्नान्कथं प्रक्ष्यामि? पुनस्तेन

विनिश्चितम्-भवतु तावत्तेषां त्रयाणामेव प्रश्नानां विषये पृच्छामि। मम प्रश्नाः यथावत्तिष्ठन्तु। परकार्यकरणमपि श्रेयसः पन्थाः-इति धर्मशास्त्रीयं वचनम्।

युवकोऽयं सर्वप्रथमं मणिधरसर्पस्य प्रश्नमपृच्छत् ''कदा स मणिधरसर्पः सर्पयोनिं परित्यज्य मानव-योनिं प्राप्स्यति? सिद्धपुरुषः प्राह-यदा स मणिधरः स्वमणिं परित्यक्ष्यति तदैव सर्पयोनिं परित्यज्य मानवयोनिं प्राप्स्यति। तदनन्तरं युवकोऽयं द्वितीयं प्रश्नं पृष्टवान्। कृषकस्य सा मूका पुत्री कदा वदिष्यति? कृषकयुवकस्य तृतीयः प्रश्नश्चासीत्-तौ चाम्रवृक्षौ कदा फलिष्यतः? सिद्धपुरुषेणोदीरितम्- तयोर्वृक्षयोर्मध्ये रत्नराशिर्निगडिता वर्तते, यदा सा राशिर्निगमिष्यति तदा तौ वृक्षौ फलिष्यतः, इत्युक्त्वा तूर्णमेव सिद्धपुरुषः स्वपर्णकुटीकक्षं प्रविष्टः। युवकोऽप्ययं तं प्रणम्य स्वगृहं प्रति प्रतस्थे। अहो, महान् महिमा वर्तते सिद्धपुरुषस्य।

पुनर्युवकोऽयं स्वगृहं प्रति पदातिः प्रचलन्नास्ते। प्रचलन्नसौ तमेव नदीतटं प्राप। तत्र मणिधरो ब्रूते-भ्रातः! पूर्वं भवन्तं नदीपारं नयामि, तदनन्तरं कथय मत्प्रश्नस्योत्तरम्। युवको मणिधरमनुसरन् नदीपारं प्राप्य प्रोवाच-भवत्कार्यं कृतं मया। सिद्धपुरुषेण कथितम्- ''यदा भवान् स्वमणिं त्यक्ष्यति तदा सर्पयोनिं परित्यज्य मानवयोनिं प्राप्स्यति''।

मणिधरेण सर्पेण विचारितम् -अयं युवक एव सत्पात्रं वर्तते मणिप्रदानाय। अनेन सफलं कृतं मम भावि-जीवनम्, अतोऽस्मै प्रदेयोऽयं मणिर्मया। तत्क्षणमेव सर्पः स्वमुखात्मणिमिमं निष्कास्य कृषकयुवकाय प्रायच्छत्। मणिधरोऽयं सर्पकलेवरं विमुच्य दिव्यमानवशरीरमवाप्तवान्।

कृषकयुवकोऽयं पुनः प्रचलन् तं ग्रामं समागतवान् यत्र कृषकदम्पती मूका पुत्री चातिष्ठत्। समामनं कृषकयुवकं वीक्ष्य प्रहर्षितौ कृषकदम्पती प्राचतुः-किमावयोः प्रश्नः पृष्टो भवता? कृषकयुवकः प्रोवाच-तव कन्या सर्वप्रथमं स्वपत्या सह वदिष्यति तदनन्तरमन्यैः। कृषकयुवकस्तस्यां रात्रौ तत्रैव विश्राममकरोत्। कृषकदम्पतीभ्यां विचारितम्-अनेन युवकेन सह अस्या विवाहः प्रातः काले करणीयः। कृषकयुवकेनापि प्रस्तावोऽयं स्वीकृतः। स्वर्णिमे प्रभाते तयोर्विवाहः संवृत्तः। कृषको वृषभशकटीं संयोज्य यौतुकादिभिः सम्पूज्य स्वपुत्रीं पतिगृहं प्रेषितवान्। विवाहसमकालमेव सा मूका वाचाला समजायत। अहो, भाग्यस्य विडम्बना।

कृषकयुवकोऽयं वृषभशकटीमारुह्य स्वपत्न्या सह स्वग्रामं प्रति प्रस्थितः। मार्गे कृषकदम्पती तं प्रतीक्षमाणौ तिष्ठतः प्रोचतुश्च -भ्रातः! किमस्माकं प्रश्नः पृष्टो भवता?

कृषकयुवको ब्रूते-आम्रवृक्षयोरनयोर्मध्ये रत्नराशिर्निगडिता वर्तते। यदा रत्नराशिर्निर्गमिष्यति तदा वृक्षाविमौ फलितौ भविष्यतः। कृषकेण तत्क्षणमेव स्वचत्वारः पुत्राः समाकारिताः। ते खनित्रेण भूमिस्थां भासुरां तां रत्नखनिं निष्कासितवन्तः। अर्धं धनन्तु स तस्मै कृषकयुवकाय प्रायच्छत् येन कृपया रत्नराशेः रहस्यं प्रकटितम्। अवशिष्टं धनं स्वपुत्रेषु व्यतरदयम्।

इत्थं कृषकयुवकोऽयं सर्पमणिं, विवाहितां पत्नीं रत्नराशिञ्च प्राप्य स्वगृहमागच्छत्। तद्वैभवं विलोक्याश्चर्यचकिता माता सर्वां सरहस्यां कथां विस्तरेणापृच्छत्। पुत्रोऽप्यादितः सर्वं वृत्तान्तमश्रावयत्। तेन धनेन युवकोऽयं व्यवसायमकरोत्। किञ्चित्कालानन्तरं कोटिपतिर्जातोऽयं कृषकयुवको यथेच्छं भोगान् भुञ्जानः सुखेन स्वजीवनमयापयत्। ये जनाः श्रमशीलाः परोपकारनिरताश्च भवन्ति ते सर्वसम्पद्विभूषिताः सन्तः सुखेन लोकयात्रां निर्वहन्ति। मानवजीवने ये श्रमं कुर्वन्ति तेषां कृते किमसाध्यं वर्तते कथितं केनापि श्रमशीलेन कविना-

**श्रमस्य पूजा मनुजैर्जगत्यां**
**सदा विधेया जनजातिभूत्यै।**
**लोके न किं सिद्ध्यति वै श्रमेण,**
**श्रमेण सिद्धिं लभते मनुष्यः॥**

- १२८, मुक्तानन्दनगरम्
गोपालपुरामार्गः
जयपुरम्, राजस्थानप्रदेशः



RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वामित्व द्वारा मै. एस. डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।